# Shri Kamalajadayitashtakam

# શ્રીકમલજદયિતાષ્ટકમ્

## Document Information

Text title : kamalajadayitAShTakam

File name : kamalajadayitAShTakam.itx

Category : aShTaka, devii, sarasvatI, devI, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Transliterated by : P. R. Ramamurthy

Proofread by : P. R. Ramamurthy

Latest update : August 29, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

Shri Kamalajadayitashtakam

# શ્રીકમલજદયિતાષ્ટકમ્

શ઼ૃઙ્ગક્ષ્માભૃન્નિવાસે શુકમુખમુનિભિઃ સેવ્યમાનાઙ્ઘ્રિપદ્મે
સ્વાઙ્ગચ્છાયાવિધૂતામૃતકરસુરરાડ્વાહને વાક્સવિત્રિ ।
શમ્ભુશ્રીનાથમુખ્યામરવરનિકરૈર્મોદતઃ પૂજ્યમાને
વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૧॥

કલ્યાદૌ પાર્વતીશઃ પ્રવરસુરગણપ્રાર્થિતઃ શ્રૌતવર્ત્મ
પ્રાબલ્યં નેતુકામો યતિવરવપુષાગત્ય યાં શ઼ૃઙ્ગશૈલે ।
સંસ્થાપ્યાર્ચાં પ્રચક્રે બહુવિધનુતિભિઃ સા ત્વમિન્દ્વર્ધચૂડા
વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૨॥

પાપૌઘં ધ્વંસયિત્વા બહુજનિરચિતં કિં ચ પુણ્યાલિમારા-
ત્સમ્પાદ્યાસ્તિક્યબુદ્ધિં શ્રુતિગુરુવચનેષ્વાદરં ભક્તિદાર્ઢ્યમ્ ।
દેવાચાર્યદ્વિજાદિષ્વપિ મનુનિવહે તાવકીને નિતાન્તં
વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૩॥

વિદ્યામુદ્રાક્ષમાલામૃતઘટવિલસત્પાણિપાથોજજાલે
વિદ્યાદાનપ્રવીણે જડબધિરમુખેભ્યોઽપિ શીઘ્રં નતેભ્યઃ ।
કામાદીનાન્તરાન્મત્સહજરિપુવરાન્દેવિ નિર્મૂલ્ય વેગાત્
વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૪॥

કર્મસ્વાત્મોચિતેષુ સ્થિરતરધિષણાં દેહદાર્ઢ્યં તદર્થં
દીર્ઘં ચાયુર્યશશ્ચ ત્રિભુવનવિદિતં પાપમાર્ગાદ્વિરક્તિમ્ ।
સત્સઙ્ગં સત્કથાયાઃ શ્રવણમપિ સદા દેવિ દત્ત્વા કૃપાબ્ધે
વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૫॥

માતસ્ત્વત્પાદપદ્મં ન વિવિધકુસુમૈઃ પૂજિતં જાતુ ભક્ત્યા
ગાતું નૈવાહમીશે જડમતિરલસસ્ત્વદ્ગુણાન્દિવ્યપદ્યૈઃ ।
મૂકે સેવાવિહીનેઽપ્યનુપમકરુણામર્ભકેઽમ્બેવ કૃત્વા
વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૬॥

શાન્ત્યાદ્યાઃ સમ્પદો મે વિતર શુભકરીર્નિત્યતદ્ભિન્નબોધં
    વૈરાગ્યં મોક્ષવાઞ્છામપિ લઘુ કલય શ્રીશિવાસેવ્યમાને ।
વિદ્યાતીર્થાદિયોગિપ્રવરકરસરોજાતસમ્પૂજિતાઙ્ઘ્રે
    વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૭॥

સચ્ચિદ્રૂપાત્મનો મે શ્રુતિમનનનિદિધ્યાસનાન્યાશુ માતઃ
    સમ્પાદ્ય સ્વાન્તમેતદ્રુચિયુતમનિશં નિર્વિકલ્પે સમાધૌ ।
તુઙ્ગાતીરાઙ્કુરાજદ્વરગૃહવિલસચ્ચક્રરાજાસનસ્થે
    વિદ્યાં શુદ્ધાં ચ બુદ્ધિં કમલજદયિતે સત્વરં દેહિ મહ્યમ્ ॥ ૮॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
    ભારતીસ્વામિભિઃ વિરચિતં શ્રીકમલજદયિતાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by P R Ramamurthy

*Shri Kamalajadayitashtakam*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*